# Manahsambodhanam

# મનઃસમ્બોધનમ્

## Document Information

Text title : Manahsambodhanam

File name : manaHsambodhanam.itx

Category : misc

Location : doc_z_misc_general

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# મનઃસમ્બોધનમ્

વામાર્ધેન પ્રણયકુપિતં દક્ષિણેનાનુનેતું
સાન્ત્વાનત્યઞ્જલિષુ ઘટતે યત્પરં ભાવભેદૈઃ ।
ભાવાશ્લેષપ્રમદસુભગમ્ભાવુકં ભાવુકં તત્
ભૂયાદ્વન્દ્વં ભુવનપિતરૌ ભૂયસે શ્રેયસે નઃ ॥ ૧॥

તતસ્તત ઇતિ પરિશ્રમ્ય કિં ખિદ્યસે ત્વં
લબ્ધાલબ્ધૈરસુલભસુખૈરર્થકામૈરનર્થૈઃ ।
વિશ્રામ્યેત ક્ષણમપિ સખે ખેદસંશાન્તયે તે
વક્ષ્યામ્યેકં ગલિતનિખિલાપાયમેષોઽસ્મ્યુપાયમ્ ॥ ૨॥

પશ્યેદાનીમખિલજગતીમન્તકસ્યાન્તરસ્થા-
માશાભઙ્ગં પરિમૃશ ભૃશં ભૂયસાપ્યુદ્યમેન ।
લબ્ધેનાપિ સ્મર પરિણતૌ ભોગવૈરસ્યમન્તઃ
સ્વેનૈવ ત્વં શમસુખરસં જ્ઞાસ્યસે શાન્તવાહિ ॥ ૩॥

આયાસેનાકલય કિયતા તારકાધિષ્ણ્યમાપ્ય
પશ્યસ્યાસામપિ ચ પતનં ત્વં મધૂકાવપાતમ્ ।
કાલેનેદં કિલ કવલિતં જીર્યતિ બ્રાહ્મમણ્ડં
વિસ્રમ્ભસ્તે વપુષિ ક ઇવાયં પયોબુદ્બુદે વા ॥ ૪॥

એકદ્વા ન વનિપતયઃ કાલસાદ્ભૂતભાવા
ન દ્વિત્રાસ્તે હૃદયસુહૃદો નામમાત્રાવશેષાઃ ।
ષટ્સપ્તા ન પ્રતિભયમહાવ્યાપદસ્તેનુભૂતાઃ
સપ્તાષ્ટાનપ્યનુદિનમિદં ચિન્તયાન્તર્નિમેષાન્ ॥ ૫॥

નિર્વાણાય સ્મરહરપદં સંસ્મર પ્રાણવૃત્ત્યૈ
ચેતશ્ચિન્તાં ચિરમનુગતામુચ્ચકૈરુજ્જહાહિ ।
શાલૂરસ્ય પ્રકટતમસો યોઽપિ પાષાણગર્ભે
ધત્તે વૃત્તિં સ કિમિહ ન તે કલ્પયિષ્યત્યધીશઃ ॥ ૬॥

હન્તાશ્રાન્તં ભવમરુપથેઽલભ્યવિશ્રાન્તિભૂમા-
વામાનુષ્યાદ સુખબહુલાદા ચ સત્યાદવીચેઃ ।
યાતાયાતશ્રમમનુભવન્ યાતના યાતયામં
સર્વો લોકઃ કિમિતિ ન મનો દૃશ્યતે તે કદાપિ ॥ ૭॥

આરમ્ભાસ્તે કતિ ન વિફલા નિશ્ચિતૌ ભૂતપૂર્વાઃ
સંરમ્ભેણ દ્રવિણમરુવાઃ સાનુતર્ષં પિપાસોઃ ।
પ્રત્યાશાયા વિરમ વિષયોલ્લાપનાયા ન યાવત્
પ્રત્યાસીદત્યપિ જડમનઃ સર્વકૃન્તઃ કૃતાન્તઃ ॥ ૮॥

યાવત્તૃષ્ણા ભવતિ વિષયે યત્તદેવેહ દુઃખં
લબ્ધે તસ્મિન્નુપરમતિ સા યત્ક્ષણં તત્સુખં તે ।
તામુત્પત્તિં હૃદય નિપુણં રુન્ધિ નિત્યં સુખાસ્યૈ
પઙ્કાલેપં પરમનુકલં ક્ષાલને મા યતિષ્ઠાઃ ॥ ૯॥

દુઃખં જન્તોરુપનમતિ યન્નિષ્પ્રતીકારભોગં
તત્પ્રત્યક્ષં તવ ચ નિયતં નન્વનાયસ્યતોઽપિ ।
તત્સામાન્યં વિષયજસુખે પશ્યતાવશ્યભાવ્યં
શાન્તેનાન્તર્હૃદય ભવતા મત્પ્રિયં કુર્વતા વા ॥ ૧૦॥

સ્વચ્છન્દેન પ્રણયવિષયે માક્ષતન્ત્રં યથેદ
બાહ્યાબાહ્યં કલયસિ પદં દેહલીદીપભઙ્ગ્યા ।
બાહ્યાભ્યન્તસ્સુખતુલનયા તત્ર મધ્યસ્થવૃત્ત્યા
બૈરસ્યં ત્વં વિષયજસુખે વેત્સ્યસિ સ્વાત્મનૈવ ॥ ૧૧॥

સ્વાધોન્માથિન્યુપવદતિ યત્તત્પ્રતીકારનિષ્ઠા-
માતિષ્ઠેયા હૃદય દુરિતાયાસસાહસ્ચિરાય ।
તસ્યૈતસ્મિન્વપુષિ સકલાનર્થહેતૌ કથં તે
સર્વોત્સાહપ્રતિકૃત પદે સર્વથૈવાનુબન્ધઃ ॥ ૧૨॥

એતત્કાર્યં કૃતમિદમયં કાર્યશેષો મમેતિ
વ્યાસઙ્ગેન સ્મરસિ હૃદય શ્રેયસો ન પ્રમાદાત્ ।
કિં કર્તાસિ પ્રિયમવિદતિ હ્યસ્તનં શ્વસ્તનં વા
દિષ્ટાદિષ્ટેન્દ્રિયમતિવધે જન્મનિ ત્વં તિરશ્ચામ્ ॥ ૧૩॥

શ્વોભાવિ શ્વઃ કુશલમિતિ મા લાલસાદર્શદૃશ્યૈ-

રાશામોદૈરફલય તૃષામાનુષં સાનુષઙ્ગમ્ ।
ઈદૃક્ક્ષેમક્ષમમિહ કદા ભાવિ તે જન્મ ચેતઃ
શ્રેયોમાર્ગાનભિમુખમહં ત્વાનુયાતો હતોઽસ્મિ ॥ ૧૪॥

જન્માવશ્યં તવ શિવપદધ્યાનહીનસ્ય યસ્મિન્
ભોક્તાસે ત્વં હૃદય વિવશં દુર્દશામેકમેવ ।
તામેવાસ્મિન્નનુભવ તપોભાવિતામીશવૃત્ત્યા
ભાવાવત્તં પરશિવપદં લપ્સ્યસે તાવતૈવ ॥ ૧૫॥

રાગસ્યન્દાહિતમધુરિમા માનસાર્થસ્ત્વયાક્ષો
જીર્ણોપાનત્વગિવ ચ શુના લૌલ્યલાલારસાર્દ્રા ।
સ્વાદુઙ્કારં સ્વરસવિરસો ભુજ્યતે રજ્યતૈવ
સ્વામપ્રાજ્ઞં ક ઇવ મહતે માસુણીયેત લોકઃ ॥ ૧૬॥

પ્રાસાદાગ્રં પ્રમદવનિકા પદ્મિની કેલિશૈલઃ
સોઽહં સંરાડિતિ કિમયથાફલ્ગુસઙ્કલ્પનેન ।
સર્વેશોઽસ્મીત્યવિતથમયે ચિત્ત સઙ્કલ્પયેથાઃ
પાથઃ પ્રાયં પિબતિ મનસા કઃ પયઃ પાતુકામઃ ॥ ૧૭॥

અક્ષૈરર્થાનુપહરદિવ સ્વેન સઙ્કલ્પિતાન્વા
મામુલ્લોભં હૃદય સમમસ્કારમભ્યશ્રુષે તાન્ ।
મોઘાત્માર્થો મુહુરનુવિદન્નેવ તે નિશ્ચિતોઽહં
ગ્રાસં ગ્રાસં પરમભિલષન્નશ્નતો વા વિડાલમ્ ॥ ૧૮॥

સઙ્ખ્યાતીતં ગતરુજમપિ સ્યાત્પરાયઃ સહસ્રં
સમ્પદ્યેરન્ સરસિરુહભૂસમ્પદોઽતીત સઙ્ખ્યાઃ ।
સમ્પર્યાપ્તં કિમુ હૃદય તે લુબ્ધલોલુભ્યમાનં
યત્ત્વં મોહં પ્રતિપદમયે ગાહસે પઙ્કસિન્ધુમ્ ॥ ૧૯॥

તત્તાદૃક્ષપ્રથિતમહિમશ્રીજુષામપ્યમીષાં
લોકેશાનામપિ શતમખહ્વાદવૈરોચનીનામ્ ।
દ્રાગજ્ઞાતાયતિગતિદશામાપદં પશ્યતોપિ
પ્રત્યાશાયામનુચિતમિહાહૈતુકં કૌતુકં તે ॥ ૨૦॥

આયુર્વાયુપ્લવનવિવલત્પલ્લવાગ્રોદ બિન્દુઃ
સમ્પત્તિશ્ચ પ્રતિકલગલત્કુણ્ડિકાવારિપૂરઃ ।
સઙ્ક્ષીયન્તે તદપિ નૃપતેરન્તરદ્વારવેદ્યાં

પશ્યોન્મોહં હૃદય કુજના દુર્ઘનારાધનાય ॥ ૨૧॥

પશ્યન્તોઽપિ પ્રતિપદભવામાપદં સમ્પદુત્થાં
પુત્રક્ષેત્રપ્રણમનિચયવ્યાધયસ્સાધયામઃ ।
નાનારૂપૈરભિનયપદૈર્યેન નાનટ્યમાનાઃ
કુર્મસ્તસ્મૈ વયમિહ નમશ્ચેતસે નિર્ઘૃણાય ॥ ૨૨॥

નિદ્રાતન્દ્રીક્લમપરિભવપ્રાભૃતપ્રત્યવેક્ષા-
નિર્વૈલક્ષ્યે વિષમવિષયક્ષ્વેલનૈકાન્તલક્ષ્યે ।
યાતાયાતશ્રમફલગતિવ્યગ્રવિગ્રશ્વશીલે
સાસૌ સાસૌ ભવતિ સતિ કા યા મનઃક્ષેમકાઙ્ક્ષા ॥ ૨૩॥

અદ્યાશેઽપિ શ્વગતિગમિનસ્તે દરિદ્રાણવૃત્તેઃ
ચેતશ્ચિન્તાહૃતકણભુજઃ ક્વાધિરાજ્યં તદૈન્દ્રમ્ ।
નિત્યાતઙ્કપ્રકટમહિતોત્થાનદુઃ સ્થાસિકાના-
મિન્દ્રાદીનામથ યદિ પદં લબ્ધમપ્યસ્તિ કિં તે ॥ ૨૪॥

યેભ્યો નામ સ્પૃહયસિ મનઃસારસમ્પત્તિવિદ્યા -
વીર્યૈશ્વર્યાદ્યતિશયગુણૈરાત્મના તૈર્બુભૂષુ ।
તાવાનુસ્મરસિ ન કથામાત્રશેષાનશેષાન્
યૈષામીષામિયમપિ કથા લુપ્યતે કલ્પવેગાત્ ॥ ૨૫॥

તાન્યસ્થીનિ ક્ષતજમપિ તત્તાનિ માંસાનિ સા ત્વક્
તેઽમી કેશાઃ પૃથગિતિ મનો યાનિ બીભત્સસે ત્વમ્ ।
અન્તર્બાહ્યાશુચિઘનગડુગ્રન્થિલાં સાલભઞ્જીં
યન્ત્રાલોલામભિલષસિ યામઙ્ગના કામિનીતિ ॥ ૨૬॥

શિલ્પં કલ્પક્ષયવિનિમયપ્રત્યયપ્રત્યવેયં
પ્રાદુષ્કુર્વન્ત્યસુખસુખયોશ્ચિત્તનૃત્યસ્ય વિદ્યાઃ ।
કામાદીનામફલનટનાડમ્બરાલમ્બયષ્ટિ-
સ્તસ્યા મુષ્ટિન્ધયનયકલાકૌશલં તત્ત્વવિદ્યા ॥ ૨૭॥

હિત્વા વિદ્યામયમયમહન્તન્મમેતિ ગ્રહં ત્વં
મોહાદીનાં પદમધિશિરો ન્યસ્ય વામં રિપૂણામ્ ।
આકિઞ્ચન્યામૃતરસપિબઃ શાન્તિસૌભાગ્યલક્ષ્મી
શ્રેયઃ સૌધે રમય હૃદયાનન્દસન્દોહદોગ્ધ્રીમ્ ॥ ૨૮॥

અવધિનિયતકાલગ્રસ્તવિધ્યણ્ડગર્વે વિષયવિવશવૃત્તિં નન્દતિ સ્વેન લોકઃ ।
કુપિતકપિકપોલોદુમ્બરાન્તઃપ્રમાદ્યન્મશકકુલદશા સા ચિત્ત તે ચિન્તનીયા ॥ ૨૯॥

કિમિહ બહુભિરુક્તૈઃ સ્યાદિદં મે ન તત્સ્યાદિતિ વિષમવિમોહાપોહમહોપપત્ત્યા ।
અપરિમિતમયત્નપ્રાપ્યમાબાધહીનં શમસુખમનુભોક્તું યુઙ્ક્ષ્વ નિઃશ્રેયસાય ॥ ૩૦॥

ઇતિ પરમમૃતં યચ્ચિત્તસમ્બોધનાખ્યં
રસયતિ રસનીયં સારનિઃસારવિજ્ઞૈઃ ।
વિષમવિષયવાઞ્છામાશુ નિર્ધૂય શુદ્ધ્યા
સ નિયતમુપશામ્યન્નતિ નિર્વાણયોગમ્ ॥ ૩૧॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।

ઇતિ કૃષ્ણાનન્દેન મુનિના મનઃસમ્બોધનં કૃતમ્ ॥

The text is an appeal to the mind to study its activities past and present and desist from building castles in the air.

Here and there attempts are made to analyse the mind and its nature. What is it called the mind? Every one knows it; in fact nobody knows it. Every one knows it and none knows it is a contradiction. It implies two kinds of knowledge and two types of objects with reference to the knowledge. One is known and the other is known as unknown. The mind is known as unknown. Every thing in the world is known either as known or as unknown. The method of splitting of atom, or a luminary, the light of which has not yet reached the earth may perhaps be not known to one but, at the same time both of them are known as unknown. So also is of knowledge.
sarvaM vastu j nAtatayA aj nAtatayA vA sAkShichaitanyasya viShayaH .
સર્વં વસ્તુ જ્ઞાતતયા અજ્ઞાતતયા વા સાક્ષિચૈતન્યસ્ય વિષયઃ ।
Says Prakāśātmayati in his Pancapādikā Vivaraṇam. In case of the mind this seems to be true.

No physicist has ever made an attempt to find its size, colour, odour or taste. His scales have not been used to weigh it. No laboratory has made an experiment at it. Equally true it is that no chemist has ever used his test tubes in finding the properties of the mind. Is it divisible or not? Is it of atomic size? Is it simple or complex? Could it be seen, smelt, or felt? These questions have not been posed before him. No Sergeon's instrument seems to

have ever penetrated the mind. Perhaps mind does not come under his domain. Scientists are not worried about it or more correctly it has baffled their attempts.

It is the Yogi or a Philosopher who did make fruitful attempts to study the mind. According to him the mind is a complex, subtle, invisible and the essence of the Bhutas ükshmas. It consists of sixteen parts or rather aspects. They are desire, determination, doubt, faith, fortitude, shame, fear, and understanding. ષોડશકલં હિ સોમ્ય મનઃ.

મન્ત્ર ૩ [I.v.3]
ત્રીણ્યાત્મનેઽકુરુતેતિ મનો વાચં પ્રાણં તાન્યાત્મનેઽકુરુતાન્યત્રમના
અભૂવં નાદર્શમન્યત્રમના અભૂવં નાશ્રૌષમિતિ મનસા હ્યેવ પશ્યતિ
મનસા શ‍ૃણોતિ । કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાઽશ્રદ્ધા
ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્સર્વં મન એવ । તસ્માદપિ
પૃષ્ઠત ઉપસ્પૃષ્ટો મનસા વિજાનાતિ । યઃ કશ્ચ શબ્દો વાગેવ
સૈષા હ્યન્તમાયત્તૈષા હિ ન । પ્રાણોઽપાનો વ્યાન ઉદાનઃ સમાનોઽન
ઇત્યેતત્સર્વં પ્રાણ એવૈતન્મયો વા અયમાત્મા વાઙ્મયો મનોમયઃ પ્રાણમયઃ ॥ ૩॥

-Chandogyōpanishad. -Bṛhadaranyakōpanishad.

It is તૈજસ and elastic.
તૈજસમન્તઃકરણં પરિણમતિ – Vedantaparibhasha.
Nothing could excel it in quickness and few could compare. Its rapidity is myriad times greater than that of light. It has no barrier. It flies high up in the sky, it dives into the deep. Like the soft wax of a smith, it retains the impressions of several decades. It is fickle, explosive and full of potentialities. ચઞ્ચલં હિ મનઃ કૃષ્ણ પ્રમાથિ બલવદ્દૃઢમ્ says the Gita. In the evolution of the mind the five subtle Bhutas have their share and functions.

In Vivekachūdāmaṇi there is an analysis of the mind.
ન હ્યસ્ત્યવિદ્યા મનસોઽતિરિક્તા
મનો હ્યવિદ્યા ભવબન્ધહેતુઃ ।
તસ્મિન્વિનષ્ટે સકલં વિનષ્ટં
વિજૃમ્ભિતેઽસ્મિન્સકલં વિજૃમ્ભતે ॥ ૧૬૯॥
This aspect of the mind is elaborately broughtout in this work. The Author compares the mind to a cat sitting on a kitchen-wall with freedom on one side and captivity and bitter

enjoyment on the other. It is this mind that makes the god. man and its absence the Man-God!

It is a delightful piece-work exhibiting dalliance of poesy with its music and harmory coupled with graceful style. Thoughts and words fight for supremacy over one another. There is a ceremony about the poetry and profusion..

Proofread by Rajesh Thyagarajan

---

*Manahsambodhanam*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*